योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०६४

चतुःषष्टितमः सर्गः ६४

श्रीराम उवाच ।

जीवटब्राह्मणादीनां हंसादीनां मुनीश्वर ।

भिक्षुस्वप्नशरीराणां संपन्नं किमतः परम् ।। १

श्रीवसिष्ठ उवाच ।

रुद्रेण सह संभूय प्रबुद्धाः सर्व एव ते ।

मिथश्च दृष्टसंसारा रुद्रांशाः सुखिनः स्थिताः ।। २

तेन रुद्रेण तां मायामवलोक्य यथोदिताम् ।

स्वांशास्तामेव संसारस्थितिं ते प्रेषिताः पुनः ।। ३

श्रीरुद्र उवाच ।

गच्छताशु निजं स्थानं तत्र भुक्त्वा कलत्रकैः ।

कंचित्कालं समं भोगान्मत्सकाशमुपैष्यथ ।। ४

भविष्यथ मदंशा ये गणा मत्पुरभूषणाः ।

ततो महाप्रलयतो यास्यामस्तत्परं पदम् ।। ५

श्रीवसिष्ठ उवाच ।

इत्युक्त्वा भगवान् रुद्रस्तेषां सोऽन्तरधीयत ।

अन्त्यसंसारसंख्यानं रुद्राणां मध्यमाययौ ।। ६

प्रययुः स्वास्पदं तेऽपि जीवटब्राह्मणादयः ।

स्वकलत्रैः समं देहं क्षपयित्वाथ कालतः ।। ७

रुद्रलोकं समासाद्य भविष्यन्ति गणोत्तमाः ।

कदाचिद्व्योम्नि दृश्यन्ते तारकाकारकारिणः ।। ८

श्रीराम उवाच ।

भिक्षुसंकल्परूपास्ते जीवटब्राह्मणादयः ।

कथं सत्यत्वमायाताः संकल्पार्थे क्व सत्यता ।। ९

श्रीवसिष्ठ उवाच ।

संकल्पसत्यता त्वंशे त्यज संकल्पसत्यताम् ।

तत्र यन्नास्ति तन्नास्ति यतः सर्वात्म तत्पदम् ।। १०

यत्स्वप्ने दृश्यते यच्च संकल्पैरवलोक्यते ।

तत्तथा विद्यते तत्र सर्वकालं तदात्मकम् ।। ११

तद्देशकालात्मतया गत्वा देशान्तरं यथा ।

देशाद्देशान्तरं यद्वन्न गत्यात्मादिकं विना ।। १२

न लभ्यते तथा स्वप्नो विना तत्र न लभ्यते ।

सर्वमस्ति चितः कोशे यद्यथालोकयत्यसौ ।। १३

चित्तथा तदवाप्नोति सर्वात्मत्वादविक्षतम् ।

संकल्पः स्वप्नकस्त्वङ्ग यया च दशयाप्यते ।। १४

परमभ्यासयोगाभ्यां विना त्वेतन्न लभ्यते ।

येषां तु योगविज्ञानदृष्टयः फलिताः स्थिताः ।। १५

सर्वं सर्वत्र पश्यन्ति ते यतः शंकरादयः ।

इदमग्रगतं वस्तु तथा संकल्पितं मया ।। १६

नाप्यं यतोभयभ्रंशं स प्राप्नोत्युभयाश्रयात् ।

सर्वं ह्यभिमतं कार्यमेकनिष्ठस्य सिद्ध्यति ।। १७

दक्षिणां ककुभं गच्छन्कः प्राप्नोत्युत्तरां दिशम् ।

संकल्पार्थपरैरेव संकल्पार्थोऽवगम्यते ।। १८

अग्रस्थार्थपरैरग्रे संस्थितोर्थोऽवगम्यते ।

अग्रस्थे बुद्धिसंस्थे यः संकल्पं प्राप्तुमिच्छति ।। १९

तदासावेकनिष्ठत्वाभावात्तन्नाशयेद्द्वयम् ।

तस्मादेकार्थनिष्ठत्वाद्भिक्षुजीवेन रुद्रताम् ।। २०

प्राप्य सर्वात्मना लब्धं तथा सर्वं तथास्थितेः ।

भिक्षुसंकल्पजीवास्ते प्रत्येकं तज्जगत्पृथक् ।। २१

पश्यन्ति चैते नान्योन्यं रुद्रज्ञानादृते ततः ।

अप्रबुद्धाः प्रजायन्ते जीवा जीवान्तबोधिनः ।। २२

तदिच्छयाशु तद्रूपा बहुरूपाश्च ते इह ।

इह विद्याधरोऽहं स्यामहं स्यामिह पण्डितः ।। २३

इत्येकध्यानसाफल्यं दृष्टान्तोऽस्यां क्रियास्थितौ ।

एकत्वं च बहुत्वं च मौर्ख्यं पाण्डित्यमेव वा ।। २४

देवत्वं मानुषत्वं च देशकालक्रियाक्रमैः ।

तुल्यकालमलं कर्तुं धारणाध्यानयत्नतः ।। २५

सर्वशक्त्यः स्वरूपत्वाज्जीवस्यास्त्येकशक्तिता ।

अनन्तश्चान्तपृक्तश्च स्वभावोऽस्य स्वभावतः ।। २६

सविकासः ससंकोचोऽहिंस्रस्तेन चिदात्मनः ।

यदिच्छति तदस्याङ्ग जन्तुः संपद्यते स्वयम् ।। २७

स्वयं संपादितैरेभिर्देशकालक्रियाक्रमैः ।

योगिन्यो योगिनश्चेह तिष्ठन्त्यन्यत्र यत्र च ।। २८

इह वामुत्र भोगेन दृष्टमेतदनेकशः ।

कार्तवीर्यो गृहे तिष्ठन्सर्वेषां भयदोऽभवत् ।। २९

विष्णुः क्षीरोदधौ तिष्ठन्जायते पुरुषो भुवि ।

पश्वर्थं यान्ति तिष्ठन्त्यो योगिन्यो योगिनीगणे ।। ३०

शक्रः स्वर्गासने तिष्ठन्याति यज्ञार्थमुर्विकाम् ।

सहस्रमेकं भवति तथा चास्मिञ्जनार्दनः ।। ३१

नृणां शतानि भक्तानां मानुष्यं याति तन्नतैः ।

एकः सहस्रं भवति तथा चैष जनार्दनः ।। ३२

अंशावतारलीलाभिः कुरुते जागतीं स्थितिम् ।

एकः कान्तासहस्राणि तुल्यकालं निमेषवत् ।। ३३

एवं ते भिक्षुसंकल्पा जीवटब्राह्मणादयः ।

रुद्रविज्ञानवशतः स्वसंकल्पपुरीं गताः ।। ३४

तत्र भुक्त्वा चिरं भोगान्प्राप्य रुद्रपुरं ततः ।

गणतामावसन्तस्ते स्थास्यन्ति सपरिच्छदाः ।। ३५

नित्यं प्रफुल्लनवकल्पलतालयेषु

रुद्रेण साकमुरुरत्नगुलुच्छकेषु ।

नानाजगत्सु च तदा शिवपत्तनेषु

विद्याधरीष्वमरमौलिधराश्च रेजुः ।। ३६

इत्यार्षे श्रीवासिष्ठमहारामा० वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० गणत्वप्राप्तिर्नाम चतुःषष्टितमः सर्गः

।। ६४ ।।

स्वप्नशतरुद्रीयं समाप्तम् ।